श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीवेङ्कटेश मङ्गळाशासनम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीवेङ्कटेशमङ्गळाशासनम् ॥

श्रियः कान्ताय कल्याणनिधये निधयेऽर्थिनाम्।
श्रीवेङ्कटनिवासाय श्रीनिवासाय मङ्गळम्॥ १ ॥

लक्ष्मीसविभ्रमालोक सुभ्रूविभ्रम चक्षुषे।
चक्षुषे सर्वलोकानां वेङ्कटेशाय मङ्गळम्॥ २ ॥

श्रीवेङ्कटाद्रि शृङ्गाग्र मङ्गळाभरणाङ्घ्रये।
मङ्गळानां निवासाय श्रीनिवासाय मङ्गळम्॥ ३ ॥

सर्वावयवसौन्दर्यसम्पदा सर्वचेतसाम्।
सदा सम्मोहनायास्तु वेङ्कटेशाय मङ्गळम्॥ ४ ॥

नित्याय निरवद्याय सत्यानन्दचिदात्मने।
सर्वान्तरात्मने श्रीमद्वेङ्कटेशाय मङ्गळम्॥ ५ ॥

स्वतस्सर्वविदे सर्वशक्तये सर्वशेषिणे।
सुलभाय सुशीलाय वेङ्कटेशाय मङ्गळम्॥ ६ ॥

परस्मै ब्रह्मणे पूर्णकामाय परमात्मने।
प्रयुञ्जे परतत्त्वाय वेङ्कटेशाय मङ्गळम्॥ ७ ॥

आकालतत्त्वमश्रान्तमात्मनामनुपश्यताम्।
अतृप्त्यमृतरूपाय वेङ्कटेशाय मङ्गळम्॥ ८ ॥

प्रायस्स्वचरणौ पुंसां शरण्यत्वेन पाणिना।
कृपया दिशते श्रीमद्वेङ्कटेशाय मङ्गळम्॥ ९ ॥

दयामृततरङ्गिण्यास्तरङ्गैरिव शीतलैः।
अपाङ्गैस्सिञ्चते विश्वं वेङ्कटेशाय मङ्गळम्॥ १० ॥

www.prapatti.com

स्रग्भूषाम्बरहेतीनां सुषमाऽऽवहमूर्तये।
सर्वार्तिशमनायास्तु वेङ्कटेशाय मङ्गळम्॥ ११ ॥

श्रीवैकुण्ठविरक्ताय स्वामिपुष्करिणीतटे।
रमया रममाणाय वेङ्कटेशाय मङ्गळम्॥ १२ ॥

श्रीमत्सुन्दरजामातृमुनिमानसवासिने।
सर्वलोकनिवासाय श्रीनिवासाय मङ्गळम्॥ १३ ॥

मङ्गळाशासनपरैर्मदाचार्यपुरोगमैः।
सर्वैश्च पूर्वैराचार्यैस्सत्कृतायास्तु मङ्गळम्॥ १४ ॥

॥ इति श्रीवेङ्कटेश मङ्गळाशासनम् समाप्तम्॥

www.prapatti.com